## 2.6.2 - Supporting Document




*Somjyoti (The University News Letter –Issue_25_ &_26_ (July 2020 To December 2020), Page - 32*

### वादविवादस्पर्धा




वादविवादस्पर्धायां प्रतिभागी छात्रः रविः रादडीया

वादविवादस्पर्धायां प्रतिभागी छात्रः निकुञ्जः दवे

वर्ल्ड ऑफ वैली एवं महर्षिवाल्मीकिसंस्कृतविश्वविद्यालयस्य च संयुक्ततत्त्वावधाने वादविवादप्रतियोगिता २९/१०/२०२० तमे दिनाङ्के प्रातः १०.३० वादनतः ०१ वादनपर्य्यन्तम् आयोजिता आसीत्। अस्यां प्रतियोगितायां उत्तराखण्ड संस्कृत विश्वविद्यालय, महर्षि पाणिनि संस्कृत वैदिक विश्वविद्यालय, श्रीवेङ्कटेश्वर वैदिक विश्वविद्यालय, श्रीसोमनाथ संस्कृत विश्वविद्यालय इति चतुर्णां विश्वविद्यालयानां छात्राः भागं गृहीतवन्तः।

वादविवादस्य विषयः आसीत् – 'राज्यसमृद्धिचिन्तनं सम्यक् उताहो राष्ट्रसमृद्धिचिन्तनम्' इति। तत्र अस्माकं विश्व- विद्यालयतः ९ छात्राः नामाङ्कनं कारितवन्तः। एवमस्याः प्रतियोगितायाः निर्णायकौ स्तः – डॉ. जानकीशरणाचार्यः, डॉ. दीपेशः कतिरा महोदयश्च। अस्याः प्रतियोगितायाः संयोजिका डॉ. उमामहेश्वरी आसीत् । एवञ्च सञ्चालनं सुश्रीविदुषी बोल्लामहोदययाकारि।

*Somjyoti (The University News Letter –Issue_25_ &_26_ (July 2020 To December 2020), Page – 21*

## अस्मिन् पदवीदानसमारोहे विविधकक्ष्यासु पदकं प्राप्तानां छात्राणां सूची -

### कक्ष्यासु क्रमप्राप्ताः छात्राः

| छात्रनाम | संस्था | कक्षा | प्रतिशतम् | मुख्यविषयः |
|---|---|---|---|---|
| पण्ड्या प्रतिक महेशभाई | दर्शनम् सं.म.वि. छारोडी | शास्त्री | ८३.९८ | साहित्यम् |
| कोरिया तेजस हरेशभाई | BAPS स्वामिनारायण सं.म.वि. | शास्त्री | ८३.०५ | स्वामिनारायणवेदान्तः |
| साधु निरंजनदास देवकृष्णदास | दर्शनम् सं.म.वि. छारोडी | आचार्यः | ९१.१० | स्वामिनारायणवेदान्तः |
| अजमेरा अक्षय अतुल | BAPS स्वामिनारायण सं.म.वि. | आचार्यः | ९०.३० | स्वामिनारायणवेदान्तः |
| जोषी तुषार कनैयालाल | श्रीभागवतविद्यापीठ शिक्षाशास्त्री म.वि. | शिक्षाशास्त्री | ९३.६१ | - |
| पुरोहित सागर नरपतभाई | श्रीभागवतविद्यापीठ शिक्षाशास्त्री म.वि. | शिक्षाशास्त्री | ९३.१० | - |
| पारेख रीटा गोविंदभाई | PGDCA केन्द्रम्, पेटलाद | PGDCA | ८१.१७ | - |
| गोस्वामी रीया जयसुखगिरि | PGDCA केन्द्रम्, मांगरेळ | PGDCA | ७८.७५ | - |
| रोहित प्रेरणा मनजीभाई | एन एस पटेल म.वि. आणंद | आचार्यः (बालिका) | ७३.०५ | वास्तुशास्त्रम् |
| शर्मा कीर्ति कैलासचन्द्र | विश्वविद्यालय सं. म.वि. वेरावलम् | शास्त्री (बालिका) | ६९.९५ | सर्वदर्शनम् |

### विषयानुसारं क्रमप्राप्ताः छात्राः

| छात्रनाम | संस्था | कक्षा | प्रतिशतम् | मुख्यविषयः |
|---|---|---|---|---|
| जोषी राजकुमार परेशभाई | ब्रह्मर्षि सं.म.वि. नडियाद | आचार्यः | ७७.६० | फलितज्योतिषम् |
| हरियाणी मयूर महेन्द्रभाई | स्वामिनारायण सं.म.वि. जेतलपुर | आचार्यः | ८४.८० | नव्यव्याकरणम् |
| जोषी अशोक सोमेश्वर | बाह्यच्छात्रः | आचार्यः | ७१.०६ | पुराणेतिहासः |
| देरासरी ऋषभ जितेन्द्रभाई | अनुस्नातकभवनम्, वेरावलम् | आचार्यः | ८१.२० | साहित्यम् |


पदवीदानसमारोहे भाषमाणाः श्री-एन.गोपालस्वामिवर्य्याः


पदवीदानसमारोहे माननीयाः राज्यपालमहोदयाः

*Somjyoti (The University News Letter –Issue-27_January_to_March_2021, Page – 05*

# राष्ट्रिय-एकता-प्रतिमायाः (SOU) मार्गदर्शकेभ्यः प्रशिक्षणकार्यक्रमः

भारतसर्वकारेण वडोदरामहानगरस्य समीपे केवडीया-नामाख्ये स्थाने लोहपुरुषस्य सरदारवल्लभभाई-पटेल-महोदयस्य स्मृतौ राष्ट्रिय-एकता-प्रतिमायाः (स्टेच्यू ओफ युनिटी) स्थापना कृता वर्तते। अस्य स्थानस्य महत् वैशिष्ट्यम् अस्ति यत् अत्रत्याः मार्गदर्शकाः विविधाभिः भाषाभिः प्रवासिजनानां मार्गदर्शनं कुर्वन्ति। सरल-मानक-संस्कृतेन अपि प्रवासिनां मार्गदर्शनं स्यात् तदर्थं संस्कृतभारत्याः सहयोगेन श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य अध्यापकाः छात्राः च मार्गदर्शकानां प्रशिक्षणं कर्तुं तत्र गतवन्तः। एषः प्रशिक्षणकार्यक्रमः जनवरीमासस्य २२-२३ दिनाङ्कयोः आयोजितः। अस्मिन् प्रशिक्षण-कार्यक्रमे अनुस्नातकविभागस्य अध्यक्षः डॉ. ललितकुमारः पटेलः, अतिथ्यध्यापकः श्रीमेहुलभाई जोषी, छात्रः रविः रादडिया च प्रशिक्षकत्वेन गत्वा कार्यं कृतवन्तः। दिनद्वये सरलमानकसंस्कृतेन प्रवासिनां मार्गदर्शनं कर्तुं राष्ट्रिय-एकता-प्रतिमायाः मार्गदर्शकाः सिद्धाः। सम्प्रति तत्र संस्कृत-मार्गदर्शकस्य व्यवस्था अस्ति। अयं प्रयत्नः भारतस्य माननीय-प्रधानमन्त्रिणा श्रीनरेन्द्र-मोदिमहोदयेन “मनसः वार्ता” कार्यक्रमे उल्लेखपूर्वकं श्लाघितः।





मार्गदर्शकानां मार्गदर्शनं कुर्वन्तौ रवि रादड़िया मेहुल जोषी च